No. ५३५ घ

Title सुद्राराक्षसम् १अं॰

Author विशाखदत्तः

Extent ७ Age

Subject नाटकम्

मुद्राराक्षसम् (अपूर्णः सप्तमोऽङ्कः)

५३७ — ७ पत्र

राक्षस॰ ॐ श्रीगणेशाय नमः ॥ धन्या केयं स्थिता ते शिरसि शशिकला किं नु नामैतदस्या नामैवास्या
१ स्तदेतत्परिचितमपि ते विस्मृतं कस्य हेतोः ॥ नारीं पृच्छामि नेन्दुं कथयतु विजया न प्रमाणं य
दीन्दुर्देव्या निह्नोतुमिच्छोरिति सुरसरितं शाठ्यमव्याद्विभोर्वः ॥ १ ॥ अपि च ॥ पादस्याविर्भ
वन्तीमवनतिमवने रक्षतः स्वैरपातैः संकोचेनैव दोष्णां मुहुरभिनयतः सर्वलोकातिगा
नां ॥ दृष्टिं लक्ष्येषु नोग्रां ज्वलनकणमुचं बध्नतो दाहभीतेरित्याधारानुरोधात्त्रिपुरविजयिन
ः पातु वो दुःखनृत्तम् ॥ २ ॥ नान्द्यन्ते सूत्रधारः ॥ अलमतिप्रसंगेन ॥ आज्ञापितोस्मि परिषदा य
थाद्य सामन्तवटेश्वरदत्तपौत्रस्य महाराजपदभाक्पृथुसूनोः कवेर्विशाखदत्तस्य कृतिर्मुद्रा
राक्षसं नाम नाटकं नाटयितव्यमिति ॥ यत्सत्यं काव्यविशेषवेदिन्यां परिषदि प्रयुंजानस्य म
मापि चेतसि सुमहान्परितोषः प्रादुर्भवति ॥ कुतः ॥ चीयते बालिशस्यापि सत्क्षेत्रपतिता कृषिः
न शालेः स्तम्बकरिता वप्तुर्गुणमपेक्षते ॥ ३ ॥ तद्यावदिदानीं गृहं गत्वा गृहिणीमाहूय गृहज
नेन सह संगीतकमनुतिष्ठामि । परिक्रम्यावलोक्य च इदमस्मद्गृहम् । तद्यावत्प्रविशामि । ना नाटक
ट्येन प्रविश्यावलोक्य च ॥ अये किमिदमस्मद्गृहेषु महोत्सव इव स्वस्वक १
र्मण्यभियुक्तः परिजनः ॥ तथा हि ॥ वहति जलमियं पिनष्टि गन्धानियमियमुद्ग्रथ्यते स्रजो

विचित्राः सुशालमिदमिथं च पानकाले शुद्धरत्नयानिकलेन हुंकृतेन ४ भवतु कुटुंबिनी
माहूय पृच्छामि नेपथ्याभिमुखमवलोक्य गुणवत्युपायनिलये स्थितिहेतो साधिके त्रिव
र्गस्य मद्भवननीतिविद्ये कार्याचार्ये द्रुतमुपेहि ५ प्रविश्य नटी अज्ज इअम्हि अज्जाणाणिओए
णमे अज्जो अणुगेण्हदु स. आर्ये तिष्ठतु तावदात्तानियोगः कथय किमद्य भवत्या भगव
तो ब्राह्मणानामुपनिमंत्रणेन कुटुंबकमनुगृहीतं अथवा अभिमता भवनमतिथयः।
प्राप्ताः यदेष पाकविशेषारंभः नटी अज्ज आमंतिदा मए भअवंतो बम्हणा स. कस्मि
न्निमित्ते नटी उवरज्जदि किल भअवं चंदो त्ति स. आर्ये क एवमाह नटी एवं क्खु णअरवासी
जणो मंतेदि स. आर्ये कृतश्रमोऽस्मि चतुःषष्ट्यंगे ज्योतिःशास्त्रे तत्प्रवर्त्यतां भगवतो ब्राह्म।
णानुद्दिश्य पाकः चंद्रोपरागं प्रति तु केनापि विप्रलब्धासि पश्य क्रूरग्रहः सकेतुश्चंद्रम
संपूर्णमंडलमिदानीं अभिभवितुमिच्छति बलात् नेपथ्ये आः क एष मयि स्थिते स. रक्ष
त्येनं तु बुधयोगः नटी अज्ज अध को उण एसो धरणिगोअरो भविअ चंदं गहाहिउं
कवट्टमिच्छादि स. आर्ये यत्सत्यं मयापि नोपलक्षितः यतो भूयोऽभियुक्तः स्वरव्यक्तिमु।
पलप्स्ये क्रूरग्रहः सकेतुरिति पुनः पठति नेपथ्ये कथय क एष मयि स्थिते चंद्रगुप्तम

ग॰ समभिभवितुमिच्छति सू॰ आकर्ण्य आर्ये ज्ञातं कौटिल्यो नटी भयं नाटयति सू॰ कौटिल्यः
२ कुटिलमतिः स एष येन क्रोधाग्नौ प्रसभमदाहि नन्दवंशः चन्द्रस्य ग्रहणमिति श्रुतेः सना
म्नो मौर्येन्दोर्द्विषदभियोग इत्यवैति ७ तन्न युक्तं कुपितस्य पुरतः स्थातुं तदितस्त्वावां गच्छा
वः इति निष्क्रान्तौ प्रस्तावना ततः प्रविशति मुक्तां शिखां परामृशन् सक्रोधश्चाणक्यः कथ
य क एष मयि स्थिते चन्द्रगुप्तमभिभवितुमिच्छति पश्य नन्दकुलकालभुजङ्गीं कोपानलब
हलनीलधूमलतां अद्यापि बध्यमानां वध्यः को नेच्छति शिखां मे ८ अपि च उल्लङ्घयन्म
म समुज्ज्वलतः प्रतापं कोपस्य नन्दकुलकाननधूमकेतोः सद्यः परात्मपरिमाणविवेकमू
ढः कः शालभेन विधिना लभतां विनाशं ९ शार्ङ्गरव शार्ङ्गरव प्रविश्य शिष्यः उपाध्याय आज्ञा
पय चाणक्यः वत्स उपवेष्टुमिच्छामि शिष्यः उपाध्याय नन्वियं संनिहितवेत्रासनैव द्वार
प्रकोष्ठशाला तदत्रोपवेष्टुमर्हत्युपाध्यायः चाणक्यः वत्स कार्याभियोग एवास्मा
नाकुलयति न पुनरुपाध्यायसहभूः शिष्यजने दुःशीलता नाट्येनोपविश्यात्मगतं कथं
प्रकाशतां गतोऽयमर्थः पौरेषु यथा किल नन्दकुलविनाशजनितरोषो राक्षसः पितृवधा २
मर्षितेन सकलनन्दराज्यपरिपणप्रोत्साहितेन पर्वतकपुत्रेण मलयकेतुना सह संधाय त

दुपगृहीतेन महता म्लेच्छराजबलेन परिवृतोऽत्र केवलमभियोक्तुमुद्यत इति विचिन्त्य अथवा ये
न मया सर्वलोकप्रकाशेन देवेश वधं प्रतिज्ञातापतिस्त्रीलोकेऽस्त्रा प्रतिज्ञा समरिता सोऽहमिदानीं
प्रकाशीभवेत मध्ये न समर्थस्समर्थः किं मया शामयितव्यमिति कृतपतन यस्य मम शपामीक्षु।
त्पानवैदूनरिपुबतितिद्विशोऽपमतेः शोकधूमैः कामं मे विद्रुमेभ्योऽनयपवनहतेऽमोदमसमप्रकी
र्यं रध्यासंधांतपौरद्विजराजरहिताञ्चेदेवेशप्रयोहान्त्याद्याभावाग्नेर्विदानज्वलन इव वने।
शपामतिक्रोधवक्त्रिः १० अपि च शोकवह्नेः वनमैनेराधिपमयाद्विक्रू शाहूगाभैर्वैर्मामयाग्रा
समनतेऽवक्रूहमवशायेहहूवंतः पुरा तेपश्यपतान्तव्यैवसंप्रतिजनानन्नेमयायास्त्वयेकिरेनेव
गजेंद्रमहिशिलावितान्सिंहानामस्तानि ११ सोऽहमिदानीमवसितप्रतिज्ञाभारोऽपि दृष्टा लापे।
त्वया शस्त्रं धारयामि येन मया ह्युग्रत्वान्तनेदानवहृदयरोगाद्धवधुवः कृतात्मैयैल लक्ष्मीः स
रसिनलिनीवस्थिरपदाद्धयोः सावेतल्लोहितयमभियुक्तेनमनसाफलेकोपमीस्यादिदं भवति
वविभक्तेमहहृदिव १२ अथवा प्रगृहीते राज्ञामेकिंयुक्तवानेनदेवेशस्य किंवास्थैर्यशुल्कादिदं
वेदप्रमलत्वमाः इति विचिन्त्य प्रहोराज्ञामस्यानेदेवेशे निरतिशयाभक्तिगुणः सकललोकस्मि
न्खिद्यपिजीवति नेदानस्थावयवेहृष्यलस्य सा चिरं स्याद्यदिनेनशाकान्त इतिनिटभियोगं प्रति

रा·मु·

३

3

ननिरुद्योगैरवस्थातव्यमत इत्यस्माभिरनया बुध्या तपोवनगतोपि घातितस्तपस्वी नंदः
वंशीयः सर्वार्थसिद्धिः यावदसौ मलयकेतुमंगीकृत्य अस्मदुच्छेदाय विपुलतरं प्रपंचमुप
दर्शयत्येव अत्र तावदाकाशे लक्ष्यं बद्ध्वा साधु अमात्यराक्षस साधु साधु श्रोत्रिय साधु साधु मंत्रिबृहस्प
ते साधु कुतः ऐश्वर्यादनपेतमीश्वरमयं लोकोर्थतः सेवते तं गच्छंत्यनु ये विपत्तिषु पुनस्ते त
त्प्रतिष्ठाशया भर्तुर्ये प्रलयेपि पूर्वसुकृतासंगेन निःसंगया भक्त्या कार्यधुरां वहंति कृतिनस्ते
दुर्लभास्त्वादृशाः १३ अत एवास्माकं त्वत्संग्रहे यत्नः कथमसौ वृषलस्य साचिव्यग्रहणेन
सानुग्रहः स्यादिति कुतः अप्राज्ञेन च कातरेण च गुणः स्यात्सानुरागेण कः प्रज्ञाविक्रमशालि
नोपि हि भवेत्किं भक्तिहीनात्फलं प्रज्ञाविक्रमभक्तयः समुदिता येषां गुणा भूतये ते भृत्या नृपतेः
कलत्रमितरे संपत्सु चापत्सु च १४ तन्मयाप्यस्मिन्वस्तुनि न शयानेनैव स्थीयते यथाशक्ति
क्रियत एव तद्ग्रहणं प्रति यत्नः कथमिति अत्र तावद्वृषलपर्वतकयोरन्यतरविनाशेनापि चाण
क्यस्यापकृतं भवतीति विषकन्यकया राक्षसेनास्माकमत्यंतोपकारिमित्रं घातितस्तपस्वी प
र्वतक इति संचारितो जगति जनापवादः लोकप्रत्ययार्थमस्य चार्थस्याभिव्यक्तये पिताते ३
चाणक्येन घातित इति रहसि त्रासयित्वा भागुरायणेनापवाहितः पर्वतकपुत्रो मलयकेतुः

शाक्यः स्वल्पेषु नात्स्मम तिबलपरिशुद्धीतोपि स्तुतिं कुर्म्मानः प्रज्ञयानिवारयितुं पुनरस्य
निग्रहात्सर्वेतकवधोत्पन्नमयप्राः प्रकाशीभवत्यमार्जुमिति मत्वा निग्रहात्स्वस्वपत्नपरपत्न
योरन्तरक्षापरक्षजननिजत्मामायाबहुविधदेशवेषभाषाचारसंचारवेदिनो नानांजनाः
प्रणिधयः प्रतिष्ठितेचक्रसमप्रवरनिवासिनोनेदामात्यमहन्दंतोनिश्रुत्यप्रचारगतयः त
तत्काररागेरत्यायप्रकृतंकृत्यतामापादितास्वइन्द्रममहोत्पायिनोमहभरप्रभृतयः प्रधान
पुरुषाः शत्रुप्रयुक्तान्चतीरणरसदायिनोप्रतिविधानेप्रत्यग्रमादिनः परीक्षितभक्तयः
क्षितिपतिप्रत्यासन्नानिरूपितात्मवृत्तवान्सपुरुषाः प्रतिवासाकंसहाध्यायीमित्रसिंहश
मीनामब्राह्मणः सच ग्रीशानसादंडनीतौचतः षड्गुणेज्योतिःशास्त्रेपरंपारवीण्यमुपगा
तः सचमयात्तपरालकलिंगधारीनेदंवंशावधप्रतिज्ञानन्तरमेवक्रमसप्रस्तुपनीयसर्वेत
दामात्यैः सहसमालोच्याहितोविशेषतस्तस्मिन्नवाताः सप्तसप्तविसंभसप्तनेदानींबहुप्रयोज
नमनुष्ठेयंभविष्यति तदेवमस्मत्तोनकिंचिन्परिहास्यति वृषलएवकेवलंप्रधानप्रकृतिर
स्माहस्तारोपितराज्यतंत्रभारः सततमुदास्ते यत्स्वयमभियोगात्तुः स्वैरसाधारणैरपाकृत
तदेवराज्यंस्वलयति कृतः स्वयमाहृत्यधुंजानावलितोपिस्वभावतः नरेन्द्रास्सगजेन्द्रास्प्रा

यः सीदंतिदुःखिताः १५ ततः प्रविशति यमपटेन चरः चरः पणमहजमस्स चलणेकिं।
कज्जे देव पहिंअणेहिं पमोरत्तअगाभत्ताणं हरइ जीवयंधरुकरंते १६ अविश्य पुरिसस्स।
जीविअं हंविसमाअं विहोइमणिगाहिआअं मारेइ सव्वलोअं जाणेणजमेणजीवामो १७
जावपअेगेहं पविसियजमपडं दंसयंतो गीदयाणि तावपमिपरिक्कामति शिष्यः विलोक्य
भद्द नप्रवेष्टव्यं चरः हंहो वंभणा कस्स पडं जोहं शिष्यः अस्माकमुपाध्यायस्य गृहीतना
म्नः आर्यचाणक्यस्य चरः विहस्य हंहो बभणा अत्तणोकेरअं अस्स जेव्व पधस्स धम्मभाउआ।
स्स हरं भोदितादे हिमेपवेसं जावदेउवर्ड्डअं अस्स धम्मंउटिवसामि शिष्यः सक्रोधं धिग्मूर्ख
किं भवान स्मदुपाध्यायादर्मविन्नरः चरः हंहो वंभणा माकुप्प २ णहुव्वसव्वो सव्वंजाणादि
ताकिपितव उवरूझाओ जाणादि किंविअम्हारिसा विजाणादि शिष्यः सक्रोधं धिग्मूर्ख।
सर्वज्ञतामुपाध्यायस्य चोरयितुमिच्छसि चरः हंहो वंभणा जइ तव उवरूझाओ सव्वंजाणादि
जाणादु दाव केणचंदो अणभिप्पेदेत्ति शिष्यः मूर्ख गुरोः किमनेना ज्ञातेन भवति चरः हंहो
वंभणा उवज्झाओ जेव्व दे जाणिस्सदि जं इमिणा जाणिपणभोदि तुमं दाव एत्तियं जाणेसि ४
कमलाणं चंदो अणभिप्पेदोत्तिणपकव कमलाणमेणहराणविरूपाहिंतो विसंवदरसी

ले संपुण्णमंडलम्मि विज्जाइं याति दवितहाइं ८ चाणक्यः आकर्ण्यात्मगतं चंद्रगुप्तादप
रक्तान्पुरुषान्जानामीत्युक्तं भवति अनेन शिष्यः मूर्ख किमिदमसंबद्धमभिधीयते च
रः हंहो बम्हण हंसे बहे जे ण जाणइ एवं भवे शिष्यः यदि किं स्यात् चरः जस्स णाणिंदु जा
णेयं तेल ट्ठे चाणक्यः भद्र विस्रब्धं प्रविश लप्स्यसे श्रोतारं ज्ञातारं च चरः एसो पविसा
मि प्रविश्य पसृत्य जयदु २ अज्जो चाणक्यः विलोक्यात्मगते अये कथं प्रकृतिचित्तपरि
ज्ञाने नियुक्तो निपुणकः भद्र स्वागतं उपविश्यतां चरः जं अज्जो आणवेदि भूमावुप
विशति चाणक्यः भद्र वर्णयेदानीं स्वनियोगवृत्तान्तं अपि वृषलमनुरक्ताः प्रकृ
तयः चरः अज्ज अधइं अज्जेण तेसु तेसु वेराअकारणेसु परिहरिदेसु ग्गहीदेसु सुविहिदणीम
धेयं चंदउत्ते दिढमणुरत्ताओ पकिदीओ किं उण अत्थि एत्थ णअरे अमच्चरक्खसे
ण सह पढमसमुप्पण्णसिणेहबहुमाणा तिण्णि पुरिसा जे देवस्स चंदसिरिणो सिरिं ण सहं
ति चाणक्यः सक्रोधं ननु वक्तव्यं स्वजीवितं न सहन्त इति भद्र अपि ज्ञायते नामधेयतः
चरः अज्ज कहं अण्णादणामधेया अज्जस्स णिवेदीयंते चाणक्यः तेन हि श्रोतुमिच्छा
मि चरः सुणादु अज्जो पढमं दाव अज्जस्स रिउपक्खे बद्धपक्खवादो खवणओ जीवसि

रा.मु. ह्री चाण सहर्षमात्मगतं प्रकाशं अस्मद्विपक्षे बद्धपक्षपातः चरः जेण सा अमच्चर-
५ क्खसपउत्ता विसकण्णा देवे पव्वदीसरे समावेसिदा चाणक्यः स्वगतं जीवसिद्धिः स ताव-
दस्मत्प्रणिधिः प्रकाशं भद्र अथापरः कः चरः अज्ज अवरो वि अमच्चरक्खसस्स पियवअस्सो
कायत्थो सअडदासो णाम चाणक्यः विहस्यात्मगतं कायस्थः कायस्थ इति लघ्वी मात्रा त-
थापि न युक्तं प्राकृतमपि रिपुमवज्ञातुं तस्मिन्मया सुहृच्छद्मना सिद्धार्थको विनिक्षि-
प्तः प्रकाशं भद्र तृतीयमपि श्रोतुमिच्छामि चरः तिदिओऽवि अमच्चरक्खसस्स दुदिअं वि-
अ हिअअं पुप्फउरणिवासी मणिआरसेट्ठी चंदणदासो णाम जस्स गेहे कलत्तं णासीकदु-
अ अमच्चरक्खसो णअराओऽवक्कंतो चाण आत्मगतं नूनं सुहृत्तमो न ह्यनात्मसदृशे-
षु राक्षसः कलत्रं न्यासीकरिष्यति प्रकाशं भद्र चंदनदासस्य गृहे राक्षसेन कलत्रं न्या-
सीकृतमिति कथमवगम्यते भवता चरः अज्ज इयं अंगुलिमुद्दा अज्जं वि अवगमइस्सदि त्ति
मुद्रां समर्पयति चाणक्यः गृहीत्वा वाचयति नाम राक्षसस्य सहर्षमात्मगतं ननु वक्त-
व्यं राक्षस एवायमस्मदंगुलिप्रणयी संवृत्त इति प्रकाशं भद्र अंगुलिमुद्राधिगमं विस्तरे- ५
ण श्रोतुमिच्छामि चरः सुणादु अज्जो अत्थि दाव अहं अज्जेण पौरजणचरिदं अण्णेसिदु

णो पवञ्चरपवेसे असंकणीअं पणइजणस्स वट्टेण आहिंडन्तो अज्ज मणिआरसेट्ठिचंदणदा
सगेहं पविट्ठो म्हि तहिं जमपडं पसारिअ पउत्तो म्हि गाइदुं चाणक्यः ततस्ततः चरः तदो
अ एक्को दारओ पञ्चवरिसदेसीओ पिअदंसणो सरीराकिदीए कुमारओ बालजण
सुलहकोऊहलफुल्लिज्जमाणणअणो णिक्कमिदुं पउत्तो तदो हा णिग्गदो हा णि
ग्गदो त्ति संकापरिग्गहणिण्णुअग्गलावस्स तस्स ज्जेव ओवरकस्स अन्तो इत्थिआजणस्स उट्ठिदो म
हन्तो कोलाहलो तदो ईसिं दुआरदेसदाविअमुहीए एक्काए इत्थिआए एसो कुमारओ णिक्क
मन्तो ज्जेव णिब्भच्छिअ अवलम्बिदो कोमलाए बाहुलदाए तस्सा अ कुमारसंरोहसंभमचलिदंगु
लिआदो करादो पुरिसंगुलिपरिणाहघडिदा विअलिआ मुद्दिआ सा अ देहलीबन्धे णिवडिआ
इत्थिआए अणवबुद्धा ज्जेव मम चलणभाअं समागदा णिहुअपणामकुलबहू विअ णिच्चला
संवुत्ता मए वि अमच्चरक्खसस्स णामंकिदि त्ति हत्थे कदुअ अज्जस्स पाअमूले पाविदा ता एस
सो इमाए मुद्दाए आअमो त्ति चाणक्यः भद्र श्रुतमपसर अचिरादस्य परिश्रमस्यानुरूपं फ
लमधिगमिष्यसि चरः जं अज्जो आणवेदि त्ति निष्क्रान्तः चाणक्यः शार्ङ्गरव प्रविश्य शिष्यः
शिष्यः उपाध्याय आज्ञापय चाण वत्स मषीभाजनं पत्रं चोपनय शिष्यः यदाज्ञापय

उपाध्याय इति निष्क्रम्य पुनः प्रविश्य उपाध्याय इदं मषीभाजनं पत्रं च चाणः गृहीत्वा स्वग
तं किमत्राभिलिखामि अनेन खलु लेखेन राक्षसो जेतव्यः प्रविश्य प्रतीहारी जयतु आ
र्यो चाणः सहर्षमात्मगतं गृहीतो जयशब्दः प्रकाशं शोणोत्तरे किमागमनकार
णं प्रतीहारी अज्ज कमलमउलाआरं अंजलिं सीसे णिवेसिअ देवो चंदसिरी विण्णवेदि इच्छा
मि अज्जेण अब्भणुण्णादो देवस्स पव्वदेसरस्स पारलोइअं कादुं तेण अ धारिदपुव्वाइं आ
हरणाइं भअवंताणं बम्हणाणं पडिवादेमि त्ति चाणः सहर्षमात्मगतं साधु वृषल साधु ममै
व हृदयेन सह संमन्त्र्य संदिष्टवानसि प्रकाशं शोणोत्तरे उच्यतामस्मद्वचनाद्वृषलः साधु वत्स
साध्वभिहितः खल्वसि लोकव्यवहाराणां तदनुष्ठीयतामात्मनोभिप्रायः किं तु पर्वतेश्वर
धृतानि भूषणानि गुणवन्ति गुणवद्भ्य एव ब्राह्मणेभ्यः प्रतिपादनीयानि तदहं स्वयं प
रीक्षितगुणान्ब्राह्मणान्प्रेषयामि प्रतीहारी जं अज्जो आणवेदि त्ति निष्क्रान्ता चाणः शार्ङ्गर
व२ उच्यन्तामस्मद्वचनाद्विश्वावस्वप्रभृतयः त्रयो भ्रातरः वृषलात्प्रतिगृह्याभरणान्यहं भव
द्भिर्द्रष्टव्य इति शिष्यः यदाज्ञापयत्युपाध्याय इति निःक्रान्तः चाणः उत्तरोयं लेखार्थः पूर्वस्तु ६
कोस्तु इति विचिन्त्य आं ज्ञातं उपलब्धवानस्मि प्रणिधिभ्यः यथा तस्य म्लेच्छराजबलस्य मध्या

6

तप्रधानतमाः पंचराजानः परमासुहृत्तयासमनुवर्त्तन्ते इति तद्यथा कौलूतश्चित्रवर्म्मा
मलयनरपतिः सिंहनादो नृसिंहः काश्मीरः पुष्कराक्षो हतरिपुमहिमा सैंधवः सिंधुषेणः
मेघाख्यः पंचमोस्मिन्पृथुतुरगबलः पारसीकाधिराजो नामान्येषां लिखामि ध्रुवमहम
धुना चित्रगुप्तः प्रमार्ष्टु २० अथवा न लिखामि सर्वमेवानभिव्यक्तं तावदास्तां शार्ङ्गरव
प्रविश्य शिष्यः उपाध्याय आज्ञापय चाणक्यः वत्स श्रोत्रियलिखितान्यक्षराणि प्रयत्न
तो लिखितान्यपि नियतमस्फुटानि भवन्ति तदुच्यतामस्मद्वचनात्सिद्धार्थकः एभिरक्षरैः
शकटदासेन केनापि कस्यापि किमपि वाच्यमिति अदत्तबाह्यनामानं लेखं लेखयित्वा
मामुपतिष्ठस्व न चाख्येयमस्मै चाणक्यो लेखयतीति शिष्यः यदाज्ञापयत्युपाध्याय इति
निष्क्रान्तः चाणक्यः स्वगतं हंत जितो मलयकेतुः प्रविश्य लेखहस्तः सिद्धार्थकः २ ज
यदु २ अज्जो अज्जो अज्ज अयं एसो सअडदासेण लिहिदो लेहो चाण गृहीत्वा अहो दर्शनीया
न्यक्षराणीत्यनुवाच्य भद्र अनया मुद्रया मुद्रयैनं सिद्धार्थकः जं अज्जो आणवेदि तथा कृ
त्वा अज्ज अयं मुद्दिदो लेहो ता आणवेदु अज्जो किं अवरं अणुचिट्ठीयदु इति चाण भद्र कस्मिंश्चि
दाप्तजनानुष्ठेये कर्मणि त्वां व्यापारयितुमिच्छामि सिद्धार्थकः सहर्षं अणुग्गहिदो म्हि